श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

दैवज्ञश्रीसूर्यकवि विरचितम्

# ॥ श्री रामकृष्णविलोमकाव्यम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रामकृष्णविलोमकाव्यम् ॥

तं भूसुतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दयाश्रीः।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम् ॥ 1 ॥

चिरं विरञ्चिर्न चिरं विरञ्चिः साकारता सत्यसतारका सा।
साकारता सत्यसतारका सा चिरं विरञ्चिर्न चिरं विरञ्चिः ॥ 2 ॥

तामसीत्यसति सत्यसीमता माययाक्षमसमक्षयायमा।
माययाक्षमसमक्षयायमा तामसीत्यसति सत्यसीमता ॥ 3 ॥

का तापघ्नी तारकाद्या विपापा त्रेधा विद्या नोष्णकृत्यं निवासे।
सेवा नित्यं कृष्णनोद्या विधात्रे पापाविद्याकारताघ्नी पताका ॥ 4 ॥

श्रीरामतो मध्यमतोदि येन धीरोऽनिशं वश्यवतीवराद्वा।
द्वारावतीवश्यवशं निरोधी नयेदितो मध्यमतोऽमरा श्रीः ॥ 5 ॥

कौशिके त्रितपसि क्षरव्रती योऽददाद्द्वितनयस्वमातुरम्।
रन्तुमास्वयन तद्विदादयोऽ तीव्ररक्षसि पतत्रिकेशिकौ ॥ 6 ॥

लम्बाधरोरु त्रयलम्बनासे त्वं याहि याहि क्षरमागताज्ञा।
ज्ञातागमा रक्ष हि याहि या त्वं सेना बलं यत्र रुरोध बालम् ॥ 7 ॥

लङ्कायना नित्यगमा धवाशा साकं तयानुन्नयमानुकारा।
राकानुमा यन्ननु यातकंसा शावाधमागत्य निनाय कालम् ॥ 8 ॥

गाधिजाध्वरवैरा ये तेऽतीता रक्षसा मताः।
तामसाक्षरतातीते ये रावैरध्वजाधिगाः ॥ 9 ॥

तावदेव दया देवे यागे यावदवासना।
नासवादवया गेया वेदे यादवदेवता॥ **10** ॥

सभास्वये भग्नमनेन चापं कीनाशतानद्धरुषा शिलाशैः।
शैलाशिषारुद्धनताशनाकी पञ्चानने मग्नभये स्वभासः॥ **11** ॥

न वेद यामक्षरभामसीतां का तारका विष्णुजितेऽविवादे।
देवाविते जिष्णुविकारता का तां सीमभारक्षमयादवेन॥ **12** ॥

तीव्रगोरन्वयत्रार्यो वैदेहीमनसो मतः।
तमसो न महीदेवैर्यात्रायन्वरगोव्रती॥ **13** ॥

वेद या पद्मसदनं साधारावततार मा।
मारता तव राधा सा नन्द सद्मप यादवे॥ **14** ॥

शैवतो हननेऽरोधी यो देवेषु नृपोत्सवः।
वत्सपो नृषु वेदे यो धीरोऽनेन हतोऽवशैः॥ **15** ॥

नागोपगोऽसि क्षर मे पिनाके ऽनायोऽजने धर्मधनेन दानम्।
नन्दानने धर्मधने जयो ना केनापि मे रक्षसि गोपगो नः॥ **16** ॥

ततान दाम प्रमदा पदाय नेमे रुचामस्वनसुन्दराक्षी।
क्षीरादसुं न स्वमचारु मेने यदाप दाम प्रमदा नतातः॥ **17** ॥

तामितो मत्तसूत्रामा शापादेष विगानताम्।
तां नगाविषदेऽपाशा मात्रासूत्तमतो मिता॥ **18** ॥

नासावद्यापत्रपाज्ञाविनोदी धीरोऽनुत्या सस्मितोऽद्याविगीत्या।
त्यागी विद्यातोऽस्मि सत्यानुरोधी दीनोऽविज्ञा पात्रपद्यावसाना॥ **19** ॥

संभावितं भिक्षुरगादगारं याताधिराप स्वनघाजवंशः।
शवं जघान स्वपराधिताया रङ्गादगारक्षुभितं विभासम्॥ **20** ॥

तयातितारस्वनयागतं मा लोकापवादद्वितयं पिनाके।
केनापि यं तद्विदवाप कालो मातङ्गयानस्वरतातियातः ॥ 21 ॥

शवेऽविदा चित्रकुरङ्गमाला पञ्चावटीनर्म न रोचते वा।
वातेऽचरो नर्मनटीव चापं लामागरं कुत्रचिदाविवेश ॥ 22 ॥

नेह वा क्षिपसि पक्षिकन्धरा मालिनी स्वमतमत्त दूयते।
ते यदूत्तमतम स्वनीलिमाराधकं क्षिपसि पक्षिवाहने ॥ 23 ॥

वनान्तयानस्वणुवेदनासु योषामृतेऽरण्यगताविरोधी।
धीरोऽवितागण्यरते मृषा यो सुनादवेणुस्वनयातनां वः ॥ 24 ॥

किं नु तोयरसा पम्पा न सेवा नियतेन वै।
वैनतेयनिवासेन पापं सारयतो नु किम् ॥ 25 ॥

स नतातपहा तेने स्वं शेनाविहितागसम्।
सङ्गताहिविनाशे स्वं नेतेहाप ततान सः ॥ 26 ॥

कपितालविभागेन योषादोऽनुनयेन सः।
स नये ननु दोषायो नगे भाविलतापिकः ॥ 27 ॥

ते सभा प्रकपिवर्णमालिका नाल्पकप्रसरमभ्रकल्पिता।
ताल्पिकभ्रमरसप्रकल्पना कालिमार्णव पिक प्रभासते ॥ 28 ॥

रावणेऽक्षिपतनत्रपानते नाल्पकभ्रमणमक्रमातुरम्।
रन्तुमाक्रमणमभ्रकल्पना तेन पात्रनतपक्षिणे वरा ॥ 29 ॥

दैवे योगे सेवादानं शङ्का नाये लङ्कायाने।
नेयाकालं येनाकाशं नन्दावासे गेयो वेदैः ॥ 30 ॥

शङ्कावज्ञानुत्त्वनुज्ञावकाशं याने नद्यामुग्रमुद्याननेया।
याने नद्यामुग्रमुद्याननेया शङ्कावज्ञानुत्त्वनुज्ञावकाशम् ॥ 31 ॥

वा दिदेश द्विसीतायं यं पाथोयनसेतवे।
वैतसेन यथोपायं यन्तासीद्विशदे दिवा ॥ **32** ॥

वायुजोऽनुमतो नेमे सङ्ग्रामेऽरवितोऽह्नि वः।
वह्नितो विरमे ग्रासं मेनेऽतोऽमनुजो युवा ॥ **33** ॥

क्षताय मा यत्र रघोरितायुरङ्कानुगानन्यवयोऽयनानि।
निनाय यो वन्यनगानुकारं युतारिघोरत्रयमायताक्षः ॥ **34** ॥

तारके रिपुराप श्रीरुचा दाससुतान्वितः।
तन्वितासु सदाचारु श्रीपरा पुरि के रता ॥ **35** ॥

लङ्का रङ्कागाराध्यासं याने मेया काराव्यासे।
सेव्या राका यामे नेया सन्ध्यारागाकारं कालम् ॥ **36** ॥

॥ इति श्री रामकृष्णविलोमकाव्यं समाप्तम् ॥